फिर इन मन्त्रों से अग्नि का उपस्थान करे–

समिधाग्निमिति तं त्वेति च देवा ऋषयो गायत्री छन्दोऽग्निर्देवता अग्न्युपस्थाने विनियोगः।

ॐ समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम्। अस्मिन् व्या जुहोतन।।

ॐ तन्त्वा समिद्भिरङ्गिरो घृतेन वर्द्धयामसि बृहच्छोचा यविष्ठ्य।

इसके पश्चात् नीचे लिखे [व्याहृतियोंसहित तीन] मन्त्रों से अग्निको प्रज्वलित करे:–

त्रिव्याहृतीनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुभश्छन्दांस्यग्निवायुसूर्या देवताः, ताꣳसवितुरिति कण्वऋषिस्त्रिष्टुप् छन्दः सविता देवता, तत्सवितुरिति विश्वामित्रऋषिगायत्री छन्दः सविता देवता, विश्वानि देवेति नारायणऋषिर्गायत्री छन्दः सविता देवता सन्धुक्षणे विनियोगः।

ॐ भूर्भुवः स्वः। ॐ तासवितुर्व्वरेण्यस्य चित्रामाऽहं व्वृणे सुमतिं व्विश्वजन्याम्। यामस्य कण्वोऽअदुहत् प्रतीनाꣳसहस्त्रधारां पयसा महीं गाम्।

ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।

ॐ विश्वानि देव सवितुर्दुरितानि परासुव। यद् भद्रं तन्नऽआसुव।।

फिर बाएँ हाथ में तीन कुशा रखे और खड़ा होकर निम्न मन्त्र पढ़कर घी में भीगी हुई तीन समिधाएँ अग्नि में डाले।

पुनस्त्वेति प्रजापतिर्ऋषिस्त्रिष्टुप् छन्दोग्निर्देवता अग्नि समिन्धने विनियोगः।

पुनस्त्वादित्या रुद्रा वसवः समिन्धमाम्पुनर्ब्रह्माणो व्वसुनीथ यज्ञैः। घृतेन त्वन्तन्नवं व्वर्धयस्व सत्त्याः सन्तु यजमानस्य कामाः।।

फिर बैठकर जल से अग्नि का पर्युक्षण करे और घृत, दधि, खीर अथवा घृताक्त यव, चावल या तिल आदि से अथवा मधुर फल से निम्नलिखित मन्त्रों द्वारा चार आहुतियाँ दे। (इनमें आरम्भ की दो आहुतियाँ सायंकाल में दी जाती हैं और अन्त की दो आहुतियाँ प्रातःकाल में। सायंकाल से आरम्भ करे। सायंप्रातः मिलकर एक दिन का होम है। सायंकाल में जिस द्रव्य से होम करे उसी से प्रातःकाल भी करे।)

(सायंहोम)

ॐ अग्नेय स्वाहा, इदमग्नये न मम।
ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम।।

(प्रातर्होम)

ॐ सूर्याय स्वाहा, इदं सूर्याय न मम।
ॐ प्रजापतये स्वाहा, इदं प्रजापतये न मम।।

इसके पश्चात् अग्नि की प्रदक्षिणा करके प्रणाम करे और–

ॐ त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषु त्र्यायुषं तन्नोऽअस्तु त्र्यायुषम्।

इस मंत्र से होम के भस्म को क्रमशः ललाट, ग्रीवा दक्षिण बाहुमूल और हृदय में लगावे। 'ॐ देवा गातुविदो' आदि मंत्र के पढ़ने के बाद यह श्लोक पढ़ पर न्यूनता पूर्ति के लिए भगवान् से प्रार्थना करे–

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णस्यादिति श्रुतिः।।

और

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्।।

ॐ विष्णवे नमः।।३।।

अन्त में निम्नांकित वाक्य कहकर यह हवन कर्म भगवान् को अर्पण करे–

कृतेनानेन नित्यहोमकर्मणा श्रीपरमेश्वरः प्रीयताम् न मम।

भूतयज्ञ

धाता-विधाता आदि भूताधिष्ठातृ देवताओं के निमित्त अन्न अर्पण करना तथा कृमि, कीट, पतंग, पशु-पक्षी आदि के निमित्त भोज्य पदार्थ समर्पण करना भूतयज्ञ है। इस यज्ञ के द्वारा सम्पूर्ण प्राणियों में व्यापक परमेश्वर का पूजन होता है। पितरों को तृप्ति के लिये 'स्वधा' शब्द के उच्चारणपूर्वक अन्न-जल समर्पण करना पितृयज्ञ है। इससे पितर प्रसन्न होकर अपने आशीर्वाद से प्रसन्न करते हैं। द्वारपर आये हुए अतिथि को अन्नादि से तृप्त करना और सनकादि दिव्य मनुष्यों के निमित्त अन्न समर्पण करना **मनुष्ययज्ञ** है। इससे अतिथिरूपी नारायण की आराधना होती है, जो मानवमात्र के लिए कल्याणकारिणी है।

बलिवैश्वदेव प्रतिदिन एक ही बार होता है। पाक के अभाव में कच्चा अन्न, फल और शाक आदि से भी बलि वैश्वदेव होता है। बलिवैश्वदेव में उड़द, चना, मसूर, कोदो, कुलथी, लवण, मटर, तैल-पक्व, पर्युषित अन्न भुक्तशेष अन्न, आदि वर्जित हैं।

वैश्वदेव के प्रथम अतिथि-अभ्यागत उपस्थित हो जायं तो वैश्वदेवनिमित्त अन्न को पृथक् करके अतिथि को भिक्षा देनी चाहिये। यदि दो भाई परस्पर अलग हो जायं, उनका पाक पृथक् होने लगे तो श्राद्ध और बलिवैश्वदेव भी उन्हें अलग-अलग करने चाहिये। यदि पाक एक ही हो तो उनमें से जो ज्येष्ठ हो उसे ही करना चाहिये। घर में अलग न होने पर भी यदि एक भाई परदेश में रहता हो तो उसे अलग ही श्राद्ध अथवा बलिवैश्वदेव करना चाहिये। नित्य बलिवैश्वदेव करने से मनुष्य के समस्त पाप दूर होते हैं। बलिवेश्वदेव से बचा हुआ अन्न यज्ञ शिष्ट अन्न है। यह अमृत के समान माना गया है। जो केवल अपने लिये भोजन बनाते हैं वे पापभोगी हैं।

बलिवैश्वदेव की विधि इस प्रकार है—पहले आचमन और

प्राणायाम करके दायें हाथ की अनामिका अंगुली में कुश की पवित्री या सोने आदि की अंगूठी पहने तत्पश्चात् निम्नांकित संकल्प करे:-

हरिः ॐ तत्सत्-अद्य पूर्वोच्चारितैवं ग्रहगुणविशेषणादि-विशिष्टायां शुभपुण्यतिथौ मम गृहे पञ्चसूनाजनितसकलदोष-परिहारपूर्वकं नित्यकर्मानुष्ठानसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थं बलिवैश्वदेवाख्यं कर्म करिष्ये।

देवयज्ञ-

इसके बाद लौकिक अग्नि प्रज्ज्वलित करके अग्निदेव का इस मन्त्र को पढ़कर ध्यान करे-

ॐ चत्वारिशृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्तहस्तासोऽअस्य। त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्याँ २ आविवेश।।

फिर नीचे लिखे मन्त्र को पढ़कर अग्निदेव को मानसिक आसन दे-

ॐ एषो ह देवः प्रदिशोऽनु सर्वाः पूर्वो ह जातः स उ गर्भे अन्तः। स एव जातः स जनिष्यमाणाः प्रत्यङ्जनांस्तिष्ठति सर्वतोमुखः।।

तत्पश्चात् अग्निदेव को नमस्कार करके एक पात्र में बिना लवण (लोन) का सुपक्व अन्न रख ले और यज्ञोपवीत को सव्य रखे हुए ही दायें घुटने को पृथ्वी पर टेककर अन्न की पाँच आहुतियां नीचे लिखे पाँच मन्त्रों से दे (अग्नि न हो तो एक पात्र में जल रखकर उसी में आहुतियां छोड़ सकते हैं।)


ॐ ब्रह्मणे स्वाहा इदं ब्रह्मणे न मम। ॐ प्रजापतये स्वाहा इदं०। ॐ गृह्याभ्यः स्वाहा इदं०। ॐ कश्यपाय स्वाहा इदं०। ॐ अनुमतये स्वाहा इदं०।।

पञ्चाहुतियों के साथ कहीं इन आहुतियों का भी विधान मिलता है-

ॐ भूः स्वाहा इदमग्नये न मम। ॐ भुवः स्वाहा इदं वायवे न मम। ॐ स्वः स्वाहा इदं सूर्याय न मम। ॐ भूर्भुः स्वः स्वाहा इदं प्रजापतये न मम। ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते न मम।

भूतयज्ञ

अग्नि के पास ही पानी से चौक बनाए, उसका द्वार पूर्व की ओर रखे और उसी में निर्दिष्ट स्थानों पर क्रमशः बीस अन्न ग्रास देने चाहिये। नकशा और ग्रास अर्पण करने के मन्त्र नीचे दिये जाते हैं। एक-एक मन्त्र पढ़कर एक-एक ग्रास अर्पण करना चाहियेः—



पितृयज्ञ

यज्ञोपर्वीत को अपसव्य करके बायें घुटने को पृथ्वी पर रख कर दक्षिण की ओर मुख करके हाथ में तिल लेकर, पक्व अन्न अंकित मण्डल में निर्दिष्ट स्थान पर मन्त्र पढ़ कर रख दें।

फिर यज्ञोपवीत को सव्य करके अन्न के पात्र को धोकर वह जल अंकित मण्डल में १९ वें अंक की जगह मन्त्र पढ कर छोड़ दे।

"ॐ यक्ष्मैतत्ते निर्णेजने नमः," इदं यक्ष्मणे न मम।

मनुष्ययज्ञ–

ॐ हन्त ते सनकादिमनुष्येभ्यो नमः,
इदं हन्त ते सनकादिमनुष्येभ्यो न मम।

१. गोग्रास–

इसके बाद निम्नांकित मन्त्र पढ़ते हुए गोग्रास अर्पण करेः–

ॐ सौरभेय्यः सर्वहिताः पवित्राः पुण्यराशयः।
प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः।।
इदं गोभ्यो न मम।

२. श्वानग्रास–

फिर यज्ञोपवीत को कण्ठ में माला की भाँति करके कुत्तों के लिए ग्रास दे

ॐ द्वौ श्वानौ श्यामशबलौ वैवस्वतकुलोद्भवौ।
ताभ्यामन्नं प्रयच्छामि स्यातामेतावहिंसकौ।।
इदं श्वभ्यः न मम।

३. काकग्रास–

पुनः यज्ञोपवीत को अपसव्य करके नीचे लिखे मन्त्र को पढ़ते

हुए कौओं के लिए भूमि पर ग्रास दे:—

ॐ ऐन्द्रवारुणवायव्या याम्या वै नैऋतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयोज्झितम्॥
इदं वायसेभ्यो न मम।

४. देवादिग्रास

फिर सव्यभाव से निम्नांकित मन्त्र पढ़कर देवता आदि के लिए अन्न अर्पण करे—

ॐ देवा मनुष्याः पशवो वयांसि, सिद्धाः सयक्षोरगदैत्यसंघाः।
प्रेताः पिशाचास्तरवः समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम्।।
इदमन्नं देवादिभ्यो न मम।

५. पिपीलिकादिग्रास

इसी प्रकार आगे दिए हुए मन्त्र से चीटीं आदि के लिए अन्न दे—

ॐ पिपीलिकाः कीटपतंगकाद्या बुभुक्षिताः कर्मनिबन्धबद्धाः।
तेषां हि तृप्त्यर्थमिदं मयान्नं तेभ्यो विसृष्टं सुखिनो भवन्तु।।
इदमन्नं पिपीलिकादिभ्यो न मम।

तदनन्तर हाथ धोकर भस्म लगावे और निन्नांकित मन्त्र से अग्नि का विसर्जन करे—

ॐ यज्ञ यज्ञं गच्छ यज्ञपतिं गच्छ स्वां योनिं गच्छ स्वाहा।
एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्ववीरस्तं जुषस्व स्वाहा।।

गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥

तत्पश्चात् कर्म की न्यूनता की पूर्ति के लिए निम्नांकित श्लोकों से प्रार्थना करे—

ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्।
स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः।।
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्।।
ॐ विष्णवे नमः।।३।।

फिर नीचे लिखे पाठ को पढ़कर यज्ञ कर्म भगवान् को अर्पण करे—

अनेन वैश्वदेवाख्येन कर्मणा श्रीयज्ञनारायणस्वरूपी परमेश्वरवासुदेवः प्रीयतां न मम। ॐ तत्सद्ब्रह्मार्पणमस्तु। ॐ विष्णवे नमः।।३।।

चतुर्थ-अंशु

देवार्चन आदि

देवार्चन

सन्ध्या आदि के बाद हमारे घरों में अपने इष्टदेव और शिव, विष्णु, भगवती दुर्गा तथा गणेश और सूर्य पंचायतन या पञ्चदेवों की षोडषोपचार अर्थात् १६ प्रकार की पूजा सामग्रियों से पूजा की जाती है। पूजा की विधि यह है:-

पूर्व या उत्तर की ओर मुख करके भगवान् के सामने पवित्र आसन पर बैठ कर अपने बाँए कलश और दाएँ गन्धपुष्प धूपदीप नैवेद्य आदि वस्तुएँ सजाकर रख ले। सन्ध्या में बताई गई विधि के अनुसार आचमन और प्राणायाम करे। तत्पश्चात् निम्नांकित मन्त्र का पाठ करे-

ॐ स्वस्ति न इन्द्रो वृद्धश्रवा स्वस्ति नः पूषा विश्ववेदाः।।
स्वस्ति नस्ताक्ष्यो्ऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।

फिर संकल्प करके 'गंगे च यमुने चैव' इत्यादि मन्त्र से कलश में तीर्थों का आवाहन करे और-

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः।
मुखे तस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।।

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा।
ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः।।

अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः।
ॐ कलशाय नमः।।

अस्मिन् कलशे वरुणं सांगं सपरिवारं सशक्तिकमा-
वाहयामि स्थापयामि।

सर्वोपचारार्थे गंधाक्षतपुष्पाणि समर्पयामि। नमस्करोमि।।

कहकर अनामिका से कलश का स्पर्श कर 'वरुणाय नमः कहकर उसी कलश से जल लेकर 'ॐ अपवित्रः पवित्रो वा' आदि मंत्र से पूजा सामग्री और अपने ऊपर जल के छींटे देकर शंख बजाए। फिर दाएँ रखे हुए जलपात्र से उसे धोकर उसे अपने स्थान पर रख दे। इसके बाद पूजा में यदि शंख हो तो–

त्वं पुरा सागरोत्पन्नो विष्णुना विधृतो करे।
निर्मितः सर्वदेवैश्च पाञ्चजन्य नमोस्तुते।।

इस मंत्र से शंख की पूजा और प्रार्थना करे।

आगमार्थं तु देवानां गमानार्थं तु राक्षसाम्।
कुरु घंटे महानादं देवताह्लादकारणम्।।

इस मंत्र से घंटी बजाए। और तब गणेश, शिव, विष्णु आदि देवों का ध्यान और नमस्कार करे।

तत्पश्चात् दीपक जलाकर गन्ध-पुष्पादि से पूजन करे। इसके बाद निम्न १६ उपचारों से भगवान् की पूजा करे–

मंत्र के अन्त में उस देवता के नाम मंत्र जैसे ॐ भूर्भुवः स्वः श्रीशिवाय नमः, श्रीविष्णवे नमः, श्रीसूर्याय नमः, श्रीदुर्गायै नमः श्रीगणेशाय नमः कहकर उपचार अर्पित करे।

वैदिक (पुरुषसूक्त के) मन्त्रों के साथ पौराणिक मन्त्रों से भी पूजन किया जाता है। अथवा सर्व-साधारण पौराणिक मन्त्रों से ही देवता का षोडशोपचार पूजन सम्पन्न कर सकते हैं। षोडशोपचार ये हैं–

१. आवाहन, २. आसन, ३. पाद्य, ४. अर्घ्य, ५. आचमन, ६. स्नान, ७. वस्त्र ८. यज्ञोपवीत, ९. गन्धाक्षत, १०. पुष्प-तुलसी-दलादि ११. धूप, १२. दीप, १३. नैवेद्य और आचमन, १४. दक्षिणायुक्त ताम्बूल, १५. आरार्तिपूर्वक परिक्रमा और १६. पुष्पाञ्जलि व नमस्कार।

'प्रतिमायां जले वह्नौ नावाहनविसर्जने।'

इसके अनुसार आवाहन को छोड़कर शेष पूजा की जाए।

यहां भगवान् शंकर के पूजन की विधि दी जा रही है। भगवान् विष्णु तथा भगवती दुर्गा आदि का पूजन भी इन्ही मंत्रों से किया जाता है। केवल 'शंकराय नमः' के स्थान पर विष्णवे नमः, दुर्गायै नमः आदि कर देना चाहिए। भगवान् विष्णु पर बिल्वपत्र के स्थान पर तुलसी चढ़ाई जाती है यहाँ उनके मंत्र आदि अलग दे दिये हैं।

घर में पञ्चदेवों की स्थापना और पूजा की जाए तो अपने इष्टदेव या प्रमुख उपास्य देव को मध्य में और चारों देवों की अगले पृष्ठ पर दिए गए चित्र के अनुसार यथास्थान स्थापित करना चाहिए।

पञ्चायतनदेवतास्थान

(१) श्रीशिवपञ्चायतनम्			(२) श्रीविष्णुपञ्चायतनम्		
विष्णु		सूर्य	शिव		गणेश
	शिव			विष्णु	
देवी		गणेश	देवी		सूर्य
(३) श्रीसूर्यपञ्चायतनम्			**(४) श्रीदेवीपञ्चायतनम्**		
शिव		गणेश	विष्णु		शिव
	सूर्य			देवी	
देवी		विष्णु	सूर्य		गणेश

(५) श्रीगणेशपञ्चायतनम्		
विष्णु		शिव
	गणेश	
देवी		सूर्य

स जयति सिन्धुरवदनो देवो यत्पादपङ्कजस्मरणम्।
वासरमणिरिव तमसां राशीन्नाशयति विघ्नानाम्।।१।।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः।
लम्बोदरश्च विकटो विघ्ननाशो विनायकः।।२।।

धूम्रकेतुर्गणाध्यक्षो भालचन्दो गजाननः।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि।।३।।

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा।
संग्रामे संकटे चैव विघ्नस्तस्य न जायते।।४।।

शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।५।।

श्रीमन्महागणाधिपतये नमः।

उन गजवदन देवदेवकी जय हो, जिनके चरणकमल का स्मरण सम्पूर्ण विघ्नसमूह को इस प्रकार नष्ट कर देता है, जैसे सूर्य अन्धकार-राशि को।।१।। जो पुरुष विद्यारम्भ, विवाह, गृहप्रवेश, निर्गमन (घर से बाहर जाने), संग्राम अथवा संकट के समय सुमुख, एकदन्त, कपिल, गजकर्ण, लम्बोदर, विकट विघ्ननाशन, विनायक धूम्रकेतु, गणाध्यक्ष, भालचन्द्र और गजानन–इन बारह नामों का पाठ या श्रवण भी करता है, उसे किसी प्रकार का विघ्न नहीं होता।।२-४।। जो श्वेत वस्त्र धारण किये हैं, चन्द्रमा के समान जिनका वर्ण है तथा जो प्रसन्नवदन हैं, उन देवदेव चतुर्भुज भगवान् विष्णु का सब विघ्नों की निवृत्ति के लिये ध्यान करना चाहिए।।५।।

पूर्वोक्त प्रकार से सर्व प्रथम गणेशजी का स्मरण करना चाहिए। तब निम्न प्रकार से संकल्प करेः–

संकल्प–विष्णुर्विष्णुर्ष्णिुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणो द्वितीये परार्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भारतवर्षे (भरतखण्डे)जम्बुद्वीपे अस्मिन्वर्तमाने अमुकनामसंवत्सरे अमुकाऽयने अमुकर्तौ अमुकमासे अमुकपक्षे

अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवंगुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममाऽत्मनः श्रुतिस्मृतिपुराणोक्त-फलप्राप्त्यर्थम् इह जन्मनि जन्मान्तरे वा सकलदुरितोपशमनार्थं तथा मम सभार्यस्य सपुत्रस्य सबान्धवस्य अखिलकुटुम्बसहितस्य सपशोः समस्तभय-व्याधिरापीडामृत्युपरिहारद्वारा आयुरारोग्यैश्वर्याभिवृद्ध्यर्थम् आधिदैविकाऽधि भौतिकाऽध्यात्मिकत्रिविधतापोपशमनार्थं धर्मार्थकाममोक्षफलावाप्त्यर्थं च ॐ भूर्भुवः स्वः श्रीअमुकपञ्चायतनदेवताप्रीत्यर्थं यथाज्ञानेन यथामिलितोपचारद्रव्यैः पुरुषसूक्तेन ध्यानावाहनादिषोडशोपचारैः पूजनमहं करिष्ये।

सर्व प्रथम धूप दीप जला ले। दीप प्रज्वलित करते समय यह मन्त्र पढ़े:—

भक्त्या दीपं प्रयच्छामि देवाय परमात्मने।
त्राहि मां निरयाद्घोराद्दीपज्योतिर्नमोऽस्तु ते।।

ॐ अग्निर्ज्योतिर्ज्योतिरग्निꣳ स्वाहा सूर्यो ज्योतिर्ज्योतिꣳसूर्यꣳ स्वाहा अग्निर्वर्चो ज्योतिर्वर्चꣳ स्वाहा सूर्यो वर्चो ज्योतिर्वर्चꣳस्वाहा। ज्योतिꣳसूर्यꣳ सूर्यो ज्योतिꣳस्वाहा। ॐ भूर्भुवः स्वः दीपस्थदेवतायै नमः आवाहयामि। सर्वोपचारार्थं गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि।

तब पञ्चायतन देवों का ध्यान इन मंत्रों से करे:—

श्रीशिवध्यानम्—

ॐ ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं,
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं,
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।।

श्रीविष्णुध्यानम्—

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं,
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।

लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यं,
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्।।

श्रीसूर्यध्यानम्

ॐ ध्येयः सदा सवितृमण्डलमध्यवर्ती,
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान्मकरकुण्डलवान्किरीटी,
हारी हिरण्मयवपुर्धृतशंखचक्रः।।

श्रीगणपतिध्यानम्

श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः,
क्षीराब्धौ रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम्।
दोर्भिः पाशांकुशाब्जाभयवरमनसं चन्द्रमौलिं त्रिनेत्रं,
ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम्।।

श्रीदेवीध्यानम्

विद्युद्दामसमप्रभां मृगपतिस्कन्धस्थितां भीषणां,
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम्।
हस्तैश्चक्रगदासिखेटविशिखांश्चापं गुणं तर्जनीं,
विभ्राणामनलात्मिकां शशिधरां दुर्गां त्रिनेत्रां भजे।।

ॐ भूर्भुवः स्वः श्रीशिवपञ्चायतन-
देवताभ्यो नमः ध्यायामि।
(आवाहनाभावे पुष्पाञ्जल्यर्पणम्)।

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
सभूमि ँ सर्व्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्।।

आगच्छ देवदेवेश, तेजोराशे जगत्पते।
क्रियमाणां मया पूजां गृहाण सुरसत्तम।।

षोडशोपचारपूजन–

सर्वप्रथम भगवान् को पुष्प का आसन अर्पित करे–

ॐ पुरुषऽएवेदꣳसर्वं यद्भूतं यच्च भाव्यम्,
उतामृतत्वस्येशानो यदन्नेनातिरोहति।
रम्यं सुशोभनं दिव्यं सर्वसौख्यौकरं शुभम्।
आसनं च मया दत्तं गृहाण परमेश्वर।।
ॐ इदमासनं समर्पयामि भगवते श्रीशंकराय नमः।

फिर निम्न मन्त्र का उच्चारण कर भगवान् के चरणकमलों को धोकर उस जल को अपने मस्तक पर धारण करना चाहिये–

ॐ एतावानस्य महिमातो ज्यायांश्च पूरुषः,
पादोस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि।
उष्णोदकं निर्मलं च सर्वसौगन्ध्यसंयुतम्।
पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम्।
ॐपाद्यं समर्पयामि भगवते श्रीशंकराय नमः।

फिर निम्न मन्त्र को पढ़कर भगवान् के कर-कमलों में अर्घ्य-पवित्र जल छोड़ना चाहिए–

ॐ त्रिपादूर्द्धवऽउदैत्पुरुषः पादोस्येहाभवत्पुनः,
ततो विष्वङ् व्यक्रामत् साशनानशनेऽअभि।
अर्घ्यं गृहाण देवेश गन्धपुष्पाक्षतैः सह।
करुणाकर मे देव गृहाणार्घ्यं नमोस्तु ते।।
ॐ हस्तयोरर्घ्यं समर्पयामि श्रीशकंराय नमः।

फिर यह मन्त्र कहकर भगवान् को आचमन करना चाहिए–

ॐ ततो विराडजायत विराजोऽअधि पूरुषः,
सजातोऽअत्यरिच्यत पश्चाद् भूमिमथो पुरः।।

सर्वतीर्थसमायुक्तं सुगन्धिं निर्मलं जलम्।
आचम्यतां मया दत्तं गृहीत्वा परमेश्वर।।
ॐ आचमनीयं समर्पयामि भगवते श्रीशंकराय नमः।

फिर निम्न मन्त्र कहकर भगवान् को शुद्ध जल से स्नान कराए–

ॐ तस्माद्यज्ञात्सर्व्वहुतः सम्भृतम्पृषदाज्यम्,
पशूंस्ताँश्चक्रेव्वायव्व्यानारायण्याग्ग्राम्याश्च ये।

ॐ गङ्गासरस्वतीरेवापयोष्णीनर्मदाजलैः।
स्नापितोऽसि मया देव तथा शान्तिं कुरुष्व मे।।
ॐ स्नानार्थं जलं समर्पयामि श्रीशंकराय नमः।

फिर यह मन्त्र पढ़कर पहले पञ्चामृत से फिर शुद्ध जल से भगवान् को स्नान करावे–

ॐ पञ्च नद्यः॑ सरस्वतीमपियन्ति सस्रोतसः॑
सरस्वती तु पञ्चधा सोदेशेऽभवत्सरित्।।
पयो दधि घृतं चैव मधु च शर्करायुतम्।
पञ्चामृतं मया नीतं स्नानार्थं प्रतिगृह्यताम्।।
ॐपञ्चामृतेन पश्चाच्छुद्धोदकेन स्नापयामि भगवते श्रीशंकराय नमः।

यह मन्त्र कह कर भगवान् को वस्त्र अर्पण करेः–

ॐ तस्माद्यज्ञात्सर्व्वहुतः ऋचः सामानि जज्ञिरे,
छन्दाः॑सि जज्ञिरे तस्माद्यजुस्तस्मादजायत।

सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे।
मयाप्रपादिते तुभ्यं गृह्यतां वाससी शुभे।।
ॐ वस्त्रं समर्पयामि भगवते श्रीशंकराय नमः।

तत्पश्चात् निम्न मन्त्र पढ़कर भगवान् को यज्ञोपवीत या उसके स्थान पर अक्षत चढ़ाए–

ॐ तस्मादश्वाऽअजायन्त ये के चोभयादतः,
गावोह जज्ञिरे तस्मात्तस्माज्जाताऽअजावयः।

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम्।
उपवीतं चोत्तरीयं गृहाण परमेश्वर।।
ॐ यज्ञोपवीतं समर्पयामि भगवते श्रीशंकराय नमः।

फिर निम्न मन्त्र पढ़कर भगवान् को चन्दन-रोली आदि लगाना चाहिए—

ॐ तं व्यज्ञं वर्हिषि प्रोक्षन्पुरुषञ्जातमग्रतः।
तेन देवाऽअयजन्त साध्याऽऋषयश्च ये।।

श्रीखण्डचन्दनं दिव्यं गन्धाढ्यं सुमनोहरम्।
विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम्।।
ॐ गन्धं समर्पयामि भगवते श्रीशंकराय नमः।

(यह मन्त्र पढ़कर भगवान् को अक्षत चढ़ाए—

ॐ अक्षन्नमीमदन्त ह्यवप्रियाऽअधूषत।
अस्तोषत स्वाभानवो व्विप्रान
विष्ठयामतीयोजान्निवन्द्र ते हरी।

अक्षताँश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभिताः।
मया निवेदिता भक्त्या गृहाण परमेश्वर।।
ॐ भूर्भुवः स्वः श्रीशिवायः नमः अक्षतान्समर्पयामि।

फिर यह मन्त्र कहकर भगवान् के मस्तक पर और नासिका के सामने आकाश में पुष्प छोड़ना तथा भगवान् को माला पहनानी चाहिए—

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्,
मुखं किमस्यासीत् किम्बाहू किमूरू पादाऽउच्येते।

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो।
मयाहृतानि पूजार्थं पुष्पाणि प्रतिगृह्यताम्।।

ॐ पुष्पाणि समर्पयामि भगवते श्रीशंकराय नमः।

फिर भगवान् शंकर पर बिल्वपत्र और विष्णु पर तुलसी दल भेट करें। बिल्वपत्र चढ़ाने का मन्त्र यह है–

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम्।
त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम्।।
ॐ बिल्वपत्रं समर्पयामि भगवते श्रीशंकराय नमः।

भगवान् विष्णु की पूजा करते समय निम्न मन्त्र से तुलसीदल चढ़ाए–

तुलसी हेमरूपां च रत्नरूपां च मञ्जरीम्।
भवमोक्षप्रदां तुभ्यमर्पयामि हरिप्रियाम्।।
ॐ तुलसीदलं निवेदयामि भगवते श्रीविष्णवे नमः।

फिर यह मन्त्र पढ़कर भगवान् को धूप दे–

ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः,
ऊरू तदस्य यद्वैश्यः पद्भ्याशूद्रोअजायत।

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः।
आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम्।।
ॐ धूपमाघ्रापयामि भगवते श्रीशंकराय नमः।

फिर यह मन्त्र पढ़कर घी का दीपक भगवान् के आगे रखना चाहिए–

ॐ चन्द्रमा मनसो जातश्चक्षोः सूर्योऽजायत,
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।

आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया।
दीपं गृहाण देवेश त्रैलोक्यतिमिरापह।।
ॐ दीपं दर्शयामि भगवते श्रीशंकराय नमः।

फिर निम्न मन्त्र से मिश्री, मिठाई और फल आदि भगवान् को नैवेद्य लगाए–

ॐ नाभ्याऽआसीदन्तरिक्ष ँ शीर्ष्णो द्यौः समवर्तत,
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँन्अकल्पयन्।

शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम्।
उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम्।।
ॐ नैवेद्यं समर्पयामि भगवते श्रीशंकराय नमः।

फिर पूर्वोक्त मन्त्र से भगवान् को आचमन कराना चाहिये।

फिर यह मन्त्र पढ़कर इलायची, लवंग और कपूर आदि सहित ताम्बूल भगवान् को अर्पण करे–

पूगीफलं महद् दिव्यं नागवल्लीदलैर्युतम्।
एलाचूर्णादिसंयुक्तं ताम्बूलं प्रतिगृह्यताम्।।
ॐ ताम्बूलं समर्पयामि श्रीशंकराय नमः।

फिर यह मन्त्र पढ़कर भगवान् पर दक्षिणा चढ़ाए–

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः।
अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे।।

फिर पृष्ठ ९८ पर दिए मन्त्र से प्रदक्षिणा कर नमस्कार करे–

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत,
व्वसन्तोऽस्यासीदाज्यं ग्ग्रीष्मऽइध्मः शरद्धविः।

फिर किसी शुद्ध पात्र में घृत की बत्ती या कपूर को प्रदीप्त करके भगवान् की आरती उतारनी चाहिये।

आरती-विधि–

विशेष–आरती क्या है और विधिपूर्वक आरती कैसे की जाए इस सम्बन्ध में कुछ आवश्यक बातें समझ लेनी चाहिए।

आरती को 'आरात्रिक' अथवा 'आरार्तिक' और 'नीराजन' भी कहते हैं। नीराजन का अर्थ है–निश्शेषेण राजनम् प्रकाशनम् अर्थात् देवविग्रह को विशेषरूप से भलीभांति प्रकाशित करना। पूजा के अन्त में आरती की जाती है पूजन में जो त्रुटि रह जाती है, आरती से

उसकी पूर्ति होती है। स्कन्दपुराण में कहा गया है–

मन्त्रहीनं क्रियाहीनं यत् कृतं पूजनं हरेः।
सर्वं सम्पूर्णतामेति कृते नीराजने शिवे।।

पूजन मन्त्रहीन और क्रियाहीन होने पर भी नीराजन (आरती) कर लेने से उसमें सारी पूर्णता आ जाती है।

विष्णुधर्मोत्तर में आया है–

धूपं चारात्रिकं पश्येत् कराभ्यां च प्रवन्दते।।
कुलकोटिं समुद्धृत्य याति विष्णोः परं पदम्।।

जो धूप और आरती को देखता है और दोनों हाथों से आरती लेता है, वह करोड़ पीढ़ियों का उद्धार करता है और भगवान् विष्णु के परमपद को प्राप्त होता है।

आरती में पहले मूलमन्त्र (जिस देवता का जिस मन्त्र से पूजन किया गया हो, उस मन्त्र) के द्वारा तीन बार पुष्पाञ्जलि देनी चाहिये और ढोल, नगारे, शंख, घड़ियाल आदि महावाद्यों के तथा जय-जयकार शब्द के साथ शुभ पात्र में घृत से या कपूर से विषम संख्या की अनेक बत्तियाँ जलाकर आरती करनी चाहिये।

ततश्च मूलमन्त्रेण दत्त्वा पुष्पाञ्जलित्रयम्।
महानीराजनं कुर्यान्महावाद्यजयस्वनैः।।
प्रज्वालयेत् तदर्थं च कर्पूरेण घृतेन वा।
आरात्रिकं शुभे पात्रे विषमानेकवर्तिकम्।।

साधारणतः पाँच बत्तियों से आरती की जाती है। इसे 'पञ्चप्रदीप' भी कहते हैं। एक, सात या उससे भी अधिक बत्तियों से आरती की जाती है। कपूर से भी आरती होती है। पद्मपुराण में आया है–

कुङ्कमागुरुकर्पूरघृतचन्दननिर्मिताः।
वर्तिकाः सप्त वा पञ्च कृत्वा वा दीपवर्त्तिकाम्।।
कुर्यात् सप्तप्रदीपेन शंखघण्टादिवाद्यकैः।

कुंकुम, अगर, कपूर, घृत और चन्दन की सात या पाँच बत्तियाँ बनाकर अथवा दिये की (रूई और घी की) बत्तियाँ बनाकर सात बत्तियों से शंख, घण्टा आदि बाजे बजाते हुए आरती करनी चाहिये।

आरती के पाँच अङ्ग होते हैं

पञ्च नीराजनं कुर्यात् प्रथमं दीपमालया।
द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा।।
चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्तितम्।
पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि।।

प्रथम दीपमाला के द्वारा, दूसरे जलयुक्त शंख से, तीसरे धूले हुए वस्त्र से, चौथे आम और पीपल आदि के पत्तों से और पाँचवें साष्टाङ्ग दण्डवत् से आरती करे।

आदौ चतुः पादतले च विष्णो-
र्द्वौ नाभिदेशे मुखबिम्ब एकम्।
सर्वेषु चाङ्गेषु च सप्तवारा-
नारात्रिकं भक्तजनस्तु कुर्यात्।।

आरती उतारते समय सर्वप्रथम भगवान् की प्रतिमा के चरणों में उसे चार बार, नाभि-देश में दो बार, एक बार मुख मण्डल पर और सात बार समस्त अङ्गों पर घुमाये।

प्रदक्षिणा—

फिर निम्न मन्त्र पढ़कर भगवान् की प्रदक्षिणा करे—

ॐ सप्तास्यासन्परिधयस्त्रिसप्तसमिधः कृताः,
देवा यद्यज्ञन्तन्वाना अबध्नन्पुरुषम्पशुम्।

यानि कानि च पापानि जन्मान्तरकृतानि च।
तानि सर्वाणि नश्यन्तु प्रदक्षिणा पदे पदे।।

मन्त्र-पुष्पाञ्जलि—

फिर निम्न मन्त्र पढ़कर सुन्दर सुगन्धित पुष्पों से अञ्जलि भरकर

भगवान् पर चढ़ाए और साष्टांग प्रणाम करे–

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् तेह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः। राजाधिराजाय प्रसह्य साहिने, नमो वयं वैश्रवणाय कुर्महे स मे कामान्कामकामाय मह्यं कामेश्वरो वैश्रवणाय ददातु कुबेराय वैश्रवणाय राजाधिराजाय महाराजाय नमः ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्य राज्यं माहाराज्यमाधिपत्यमयं समन्तपर्यायै स्यात् सार्वभौमः सार्वायुष आन्तादापरार्धात् पृथिव्यै समुद्रपर्यन्ताया एकराडिति तदप्येष श्लोकोऽभिगीतो मरुतः, परिवेष्टारो मरुत्तस्यावसन् गृहे आविक्षितश्च कामप्रेर्विश्वेदेवाः सभासद इति विश्वतश्चक्षुरुत विश्वतो मुखो, विश्वतो वाहुरुत विश्वतस्पात् संबाहुभ्यां धमति संपतत्रैर्द्यावाभूमी जनयन् देव एकः।

ॐ नमः सर्वहितार्थाय जगदाधारहेतवे।
साष्टाङ्गोऽयं प्रणामस्ते प्रयत्नेन मया कृतः।

ॐ कर्पूरगौरं करुणावतारं, संसारसारं भुजगेन्द्रहारम्।
सदा वसन्तं हृदयारविन्दे, भवं भवानीसहितं नमामि।।१।।

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं,
वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम्।
वन्दे सूर्यशशांकवाह्निनयनं वन्दे मुकुन्दप्रियं,
वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शंकरम्।।२।।

शान्तं पद्मासनस्थं शशधरमुकुटं पञ्चवक्त्रं त्रिनेत्रं,
शूलं वज्रं च खड्गं परशुमभयदं दक्षभागे वहन्तम्।
नागं पाशं च घंटां डमरुकसहितं सांकुशं वामभागे,
नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि।।३।।

आवाहनं न जानामि न जानामि तवार्चनम्।
पूजां चैव न जानामि क्षमस्व परमेश्वर।।
अन्यथा शरणं नास्ति त्वमेव शरणं मम।

तस्मात्कारुण्यभावेन रक्षस्व परमेश्वर।।

अपराधो भवत्येव सेवकस्य पदे पदे।
कोऽपरः सहतां लोके केवलं स्वामिनं विना।।

भूमौ स्खलितपादानां भूमिरेवावलम्बनम्।
त्वयि जातापराधानां त्वमेव शरणं मम।।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे।।

यदक्षरपदभ्रष्टं मात्राहीनञ्च यद्भवेत्।
क्षन्तुमर्हसि देवेश कस्य न स्खलितं मनः।।

इसके बाद शंख के जल को अपने ऊपर तथा उपस्थित सब लोगों पर छिड़के—

शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि।
अङ्गलग्नं मुनष्याणां ब्रह्महत्यां व्यपोहति।।

अन्त में निम्नलिखित मंत्र पढ़कर चरणामृत ले—

ॐ अकालमृत्युहरणं सर्वं व्याधिविनाशनम्।
देव (विष्णोः) पादोदकं पीत्वा सर्वपापैः प्रमुच्यते।

विशेषः—पूजा समाप्ति के पश्चात् देवताओं की कितनी प्रदक्षिणा की जाए, इस सम्बन्ध में लिखा है कि—

एका चण्ड्या रवेः सप्त तिस्रः कार्या विनायके।
हरेश्चतस्रः कर्तव्या शिवस्यार्धप्रदक्षिणा।।

भगवती दुर्गा की एक बार, सूर्य-प्रतिमा की सात बार, गणेश जी की तीन बार, भगवान् विष्णु की चार बार और शंकर जी की आधी प्रदक्षिणा करनी चाहिये।

साथ ही यह भी कि षोडशोपचार के रूप में भी दक्षिणा के साथ प्रदक्षिणा का विधान है और पुष्पाञ्जलि के बाद भी भगवान् की प्रदक्षिणा की जाती है।

महामृत्युञ्जय-जप विधि–

गायत्रीमंत्र-जप के साथ यदि महामृत्युंजय मंत्र का जप भी नित्य किया जाय तो इससे नानाविध आधि-व्याधि का नाश होकर आयुरारोग्य की वृद्धि और परमकल्याण की प्राप्ति होती है। महामृत्युंजय की विधि यह है–

संकल्प–

पहले पृष्ठ ९४ पर दिए गए संकल्प को 'मोक्षफलावप्त्यर्थं' तक पढ़कर अन्त में कहें कि–

श्री भगवान् महामृत्युंजय देवता प्रीत्यर्थं महामृत्युंजयमंत्रस्य' अमुक (एकशत, पञ्चाशत, एकसहस्र) संख्याकं जपं करिष्ये। तदादौ न्यासादिकं च करिष्ये।

ॐ–अस्य श्रीमहामृत्युंजयमन्त्रस्य वसिष्ठऋषिः अनुष्टुप्छन्दः श्रीत्र्यम्बकरुद्रो देवता श्रीं बीजं ह्रीं शक्तिः सर्वारिष्टनिवृत्तिपूर्वकसकल-मनोरथसिद्ध्यर्थेजपे विनियोगः।

अथ ऋष्यादिन्यासः–

ॐवसिष्ठऋषये नमः शिरसि। अनुष्टुप्छन्दसे नमः मुखे। श्रीत्र्यम्बकरुद्रदेवतायै नमः हृदये। श्रीं बीजाय नमः गुह्ये। ह्रीं शक्तये नमः पादयोः।

ॐ हौं ॐ जूँ सः भूर्भुवः स्वं त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा अंगुष्ठाभ्यां नमः। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्तये मां जीवय जीवय तर्जनीभ्यां स्वाहा। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः सुगन्धिम्पुष्टिवर्द्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा मध्यमाभ्यां वषट्। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः उर्व्वारुकमिव बन्धनात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ह्रां ह्रीं अनामिकाभ्यां हुँ। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसाममन्त्राय

कनिष्ठिकाभ्यां वौषट्। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय करतलकरपृष्ठाभ्यां फट्। एवं हृदयादि० ॐ हौं ॐ जूँ सः भूर्भुवः स्वः त्र्यम्बकं ॐ नमो भगवते रुद्राय शूलपाणये स्वाहा हृदयाय नमः। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः यजामहे ॐ नमो भगवते रुद्राय अमृतमूर्त्तये मां जीवय जीवय शिरसे स्वाहा। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः सुगन्धिम्पुष्टिवर्द्धनम् ॐ नमो भगवते रुद्राय चन्द्रशिरसे जटिने स्वाहा शिखायै वषट्। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः उर्व्वारुकमिव बन्ध नात् ॐ नमो भगवते रुद्राय त्रिपुरान्तकाय ह्रीं ह्रीं कवचाय हुँ। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः मृत्योर्मुक्षीय ॐ नमो भगवते रुद्राय त्रिलोचनाय ऋग्यजुःसाममन्त्राय नेत्रत्रयाय वौषट्। ॐ हौं ॐ जूँ सः भूर्भुवः स्वः मामृतात् ॐ नमो भगवते रुद्राय अग्नित्रयाय ज्वल ज्वल मां रक्ष रक्ष अघोरास्त्राय अस्त्राय फट्।

अथ वर्णन्यासः—

ॐ त्र्यं नमः दक्षिणचरणाग्रे। बं नमः कं नमः यं नमः जां नमः दक्षिणचरणसन्धिचतुष्केषु। मं नमः वामचरणाग्रे। हें नमः सुं नमः गं नमः धिं नमः वामचरणसन्धिचतुष्केषु। पुं नमः गुह्ये। ष्टिं नमः आधारे। वं नमः जठरे। र्द्धं नमः हृदये। नं नमः कण्ठे। ॐ उं नमः दक्षिणकराग्रे। वां नमः रुं नमः कं नमः मिं नमः दक्षिणकरसन्धिचतुष्केषु। वं नमः वामकराग्रे। वं नमः धं नमः नां नमः मृं नमः वामकरसन्धि चतुष्के। त्यों नमः वदने। मुं नमः ओष्ठयोः। क्षीं नमः घ्राणयोः। यं नमः दृशोः। मां नमः श्रवणयोः। मृं नमः भ्रुवोः। तां नमः शिरसि।

अथ पदन्यासः—

त्र्यम्बकं शिरसि। यजामहे भ्रुवोः। सुगन्धिं दृशोः। पुष्टिवर्द्धनम् मुखे। उर्व्वारुकं कण्ठे। इव हृदये। बन्धनात् उदरे। मृत्योः गुह्ये। मुक्षीय उर्व्वोः। मां जान्वोः। अमृतात् पादयोः।।

तब भगवान् महामृत्युंजय का ध्यान निम्न मंत्र से करे—

ॐ हस्ताभ्यां कलशद्वयामृतरसैराप्लावयन्तं शिरो,
द्वाभ्यां तौ दधतं मृगाऽक्षवलये द्वाभ्यां वहन्तं परम्।

अंकन्यस्तकरद्वयामृतघटं कैलाशकान्तं शिवम्,
स्वच्छाम्भोजगतं नवेन्दुमुकटाभान्तं त्रिनेत्रं भजे।।

मृत्युञ्जय महारुद्र त्राहि मां शरणागतम्।
जन्ममृत्युजरारोगैः पीडितं कर्मबन्धनैः।।

तावकस्त्वद्गतप्राणस्त्वच्चित्तोऽहं सदा मृड।
इति विज्ञाप्य देवेशं जपेन्मन्त्रञ्च त्र्यम्बकम्।।

फिर भगवान् का मानसोपचार से पूजन कर निम्नलिखति महामृत्युंजय मंत्र का जप करे—

महामृत्युंजय मंत्रः (ॐ अष्टप्रणवयुक्तः द्विपञ्चाशद्वर्णात्मकः)

ॐ हौं ॐ जूँ सः ॐ भूर्भुवः स्वः ॐत्र्यम्बकं यजामहे सुगधिम्पुष्टिवर्द्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॐ स्वर्भुवर्भूः ॐ सः जूँ ॐ हौं ॐ।।

जप-निवेदन—

जप के अन्त में निम्न मंत्र पढ़कर जप निवेदन करे—

ॐ तत्सदद्यमयाकृतः महामृत्युंजय-
मंत्रस्य अमुकसंख्याकजपः श्रीमहामृत्युंजयार्पणमस्तु।

गुह्यातिगुह्यगोप्ता त्वं गृहाणस्मत्कृतं जपम्,
सिद्धिर्भवतु मे देव त्वत्प्रसादान्महेश्वर।।

ॐ असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे,
सुरतरुवर-शाखा लेखिनी पत्रमुर्वी।।
लिखति यदि गृहीत्वा शारदा सर्वकालम्,
तदपि तव गुणानामीश पारं न याति।।

त्वमेव माता च पिता त्वमेव
त्वमेव बन्धुश्च सखा त्वमेव।
त्वमेव विद्या द्रविणं त्वमेव
त्वमेव सर्वं मम देव देव।।

महामृत्युञ्जयध्यानम्

हस्ताम्भोज-युगस्थ-कुम्भयुगलादुद्धृत्य तोयं शिरः
सिञ्चन्तं करयोर्युगेन दधतं स्वाङ्के सकुम्भौ करौ।
अक्ष-स्रग्-मृगहस्तमम्बुजगतं मूर्द्धस्थचन्द्रं स्रवत्
पीयूषोऽत्र तनुं भजे सगिरिजं मृत्युञ्जयं त्र्यम्बकम्।। १।।

चन्द्रोद्भासित-मूर्द्धजं सुरपतिं पीयूषपात्रं वहद्
हस्ताब्जेन दधत् सुदिव्यममलं हास्याय पङ्केरुहम्।
सूर्येन्द्वग्नि-विलोचनं करतले पाशाक्षसूत्राङ्कुशा-
म्भोजं बिभ्रतमक्षयं पशुपतिं मृत्युञ्जयं संस्मरे।। २।।

स्मर्त्तव्याखिललोकवर्त्ति सततं यज्जङ्गमस्थावरं
व्याप्तं येन च यत्प्रपञ्चविहितं मुक्तिश्च यत् सिद्ध्यति।
यद्वा स्यात् प्रणवत्रिभेदगहनं श्रुत्वा च यद् गीयते
तद्वस्तुस्थिति-सिद्धयेऽस्तु वरदं ज्योतिस्त्रयोत्थं महः।। ३।।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।
उर्वारुकमिव बन्धनान् मृत्योर्मुक्षीय मा ऽमृतात्।। ४।।

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्वबीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम्।। ५।।

इति महामृत्युञ्जयध्यानं समाप्तम्

महामृत्युञ्जयस्तोत्रम्

ॐ अस्य श्रीमहामृत्युञ्जयस्तोत्रमन्त्रस्य श्रीमार्कण्डेय ऋषिः, अनुष्टुप् छन्दः, श्रीमृत्युञ्जयो देवता, गौरी शक्तिः, मम सर्वारिष्टसमस्तमृत्युशान्त्यर्थं सकलैश्वर्य-प्राप्त्यर्थं च जपे विनियोगः।

ध्यानम्

चन्द्रर्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्ष-सूत्रविलसत्पाणिं हिमांशुप्रभम्।
कोटीन्दु-प्रगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्तं विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावयेत्॥

ॐ रुद्रं पशुपतिं स्थाणुं नीलकण्ठमुमापतिम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति।। १।।

नीलकण्ठं कालमूर्तिं कालज्ञं कालनाशनम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ २॥

नीलकण्ठं विरूपाक्षं निर्मलं निलयप्रभम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ ३॥

वामदेवं महादेवं लोकनाथं जगद्गुरुम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ ४॥

देवदेवं जगन्नाथं देवेशं वृषभध्वजम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ ५॥

गङ्गाधरं महादेवं सर्वाभरणभूषितम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ ६॥

अनाथः परमानन्दं कैवल्यपदगामिनम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ ७॥

स्वर्गापवर्गदातारं सृष्टि-स्थिति-विनाशकम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ ८॥

उत्पत्ति-स्थिति-संहारकर्त्तारमीश्वरं गुरुम्।
नमामि शिरसा देवं किं नो मृत्युः करिष्यति॥ ९॥

मार्कण्डेयकृतं स्तोत्रं यः पठेच्छिवसन्निधौ।
तस्य मृत्युभयं नास्ति नाऽग्निचौरभयं क्वचित्॥ १०॥

शतावर्तं प्रकर्तव्यं सङ्कटे कष्टनाशनम्।
शुचिर्भूत्वा पठेत् स्तोत्रं सर्वसिद्धिप्रदायकम्॥ ११॥

मृत्युञ्जय महादेव त्राहि मां शरणागतम्।
जन्म-मृत्युजरा-रोगैः पीडितं कर्मबन्धनैः॥ १२॥

तावतस्त्वद्‌गतप्राणस्त्वच्चित्तोऽहं सदा मृड।
इति विज्ञाप्य देवेशं त्र्यम्बकाख्यमनु जपेत्॥ १३॥

नमः शिवाय साम्बाय हरये परमात्मने।
प्रणतक्लेशनाशाय योगिनां पतये नमः॥ १४॥

शताङ्गायुर्मन्त्रः—ॐ ह्रीं श्रीं ह्रीं ह्रैं ह्रः हन हन दह दह पच पच गृहाण गृहाण मारय मारय मर्दय मर्दय महामहाभैरव भैरवरूपेण धुनुय धुनुय कम्पय कम्पय विघ्नय विघ्नय विश्वेश्वर क्षोभय क्षोभय कटु कटु मोहय हुंफट् स्वाहा। इति मन्त्रमात्रेण समाभीष्टो भवति॥ २५॥

इति श्रीमार्कण्डेयपुराणे मार्कण्डेयकृतं
महामृत्युञ्जयस्तोत्रं सम्पूर्णम्।

वेदसारशिवस्तवः

पशूनां पतिं पापनाशं परेशं
गजेन्द्रस्य कृत्तिं वसानं वरेण्यम्।
जटाजूटमध्ये स्फुरद्‌गाङ्गवारिं
महादेवमेकं स्मरामि स्मरारिम्॥ १॥

महेशं सुरेशं सुरारार्तिनाशं
विभुं विश्वनाथं विभूत्यङ्गभूषम्।

विरूपाक्षमिन्द्वर्कवह्नित्रिनेत्रं
सदानन्दमीडे प्रभुं पञ्चवक्त्रम्।। २।।

गिरिशं गणेशं गले नीलवर्णं
गवेन्द्राधिरूढं गुणातीतरूपम्।
भवं भास्वरं भस्मना भूषिताङ्गं
भवानीकलत्रं भजे पञ्चवक्त्रम्।। ३।।

शिवाकान्त शम्भो शशाङ्कार्धमौले
महेशान शूलिन् जटाजूटधारिन्।
त्वमेको जगद्व्यापको विश्वरूप
प्रसीद प्रसीद प्रभो पूर्णरूप।। ४।।

परात्मानमेकं जगद्बीजमाद्यं
निरीहं निराकारमोङ्कारवेद्यम्।
यतो जायते पाल्यते येन विश्वं
तमीशं भजे लीयते यत्र विश्वम्।। ५।।

न भूमिर्न चापो न वह्निर्न वायु-
र्न चाकाशमास्ते न तन्द्रा न निद्रा।
न ग्रीष्मो न शीतं न देशो न वेषो
न यस्यास्ति मूर्तिस्त्रिमूर्तिं तमीडे।। ६।।

अजं शाश्वतं कारणं कारणानां
शिवं केवलं भासकं भासकानाम्।
तुरीयं तमःपारमाद्यन्तहीनं
प्रपद्ये परं पावनं द्वैतहीनम्।। ७।।

नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते।
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य।। ८।।

प्रभो शूलपाणे विभो विश्वनाथ
महादेव शम्भो महेश त्रिनेत्र।
शिवाकान्त शान्त स्मरारे पुरारे
त्वदन्यो वरेण्यो न मान्यो न गण्यः।। ९।।

शम्भो महेश करुणामय शूलपाणे
गौरीपते पशुपते पशुपाशनाशिन्।
काशीपते करुणया जगदेतदेक-
स्त्वं हंसि पासि विदधासि महेश्वरोऽसि।। १०।।

त्वत्तो जगद्भवति देव भव स्मरारे
त्वय्येव तिष्ठति जगन्मृड विश्वनाथ।
त्वय्येव गच्छति लयं जगदेतदीश
लिङ्गात्मकं हर चराचरविश्वरूपिन्।। ११।।

इति श्रीमच्छङ्कराचार्यकृतो वेदसारशिवस्तवः सम्पूर्णः।

पञ्चम-अंशु

(परिशिष्ट-आरतियाँ आदि)

श्री गणेश जी की आरती

आरति गजवदन विनायक की।
सुर-मुनि-पूजित गणनायक की।। टेक
एकदंत शशिभाल गजानन।।
विघ्नविनाशक शुभगुण-कानन,
शिवसुत वन्द्यमान-चतुरानन।
दु:खविनाशक सुखदायक की।। सुर०
ऋद्धि-सिद्धि-स्वामी समर्थ अति,
विमल बुद्धि दाता सुविमल-मति,
अघ-वन-दहन, अमल अविगत-गति,
विद्या-विनय-विभव-दायक की।। सुर०
पिङ्गलनयन, विशाल शुंडधर,
धूम्रवर्ण शुचि वज्राकुंश-कर,
लम्बोदर बाधा-विपत्ति-हर,
सुरवन्दित सब विधि लायक की।। सुर०

भगवान् शंकर

ॐ जय गंगाधर जय हर जय गिरिजाधीशा।
त्वं मां पालय नित्यं कृपया जगदीशा।।
हर हर हर महादेव।।

कैलासे गिरिशिखरे कल्पद्रुमविपिने।
गुञ्जति मधुकरपुञ्जे कुञ्जवने गहने।।
कोकिलकूजित-खेलत-हंसावन-ललिता।
रचयति कलाकलापं नृत्यति मुदसहिता।। हर०

तस्मिंल्ललितसुदेशे शाला मणिरचिता।
तन्मध्ये हरनिकटे गौरी मुदसहिता।
क्रीडा रचयति भूषारञ्जित निजमीशम्।
इन्द्रादिक सुर सेवत नामयते शीशम्।। हर०

विबुधवधु बहु नृत्यति हृदये मुदसहिता।
किन्नर गायन कुरुते सप्तस्वर सहिता।।
धिनकतथै थै धिनकत मृदंगं वादयते।
कण कण ललिता वेणुं मधुरं नाटयते।। हर०

रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता।
चक्रावर्ते भ्रमयति कुरुते तां धिक तां।।
तां तां लु चुप तां तां डमरुं वादयते।
अंगुष्ठांगुलिनादं लासकतां कुरुते।। हर०

कर्पूरद्युतिगौरं पञ्चाननसहितम्।
त्रिनयनशशधरमौलिं विषधरकण्ठयुतम्।।
सुन्दरजटाकलापं पावकयुतभालम्।
डमरुत्रिशूलपिनाकं करधृतनृकपालम्।। हर०

मुण्डै रचयति माला पन्नगमुपवीतम्।
वामविभागे गिरिजारूपं अतिललितम्।।
सुन्दरसकलशरीरे कृतभस्माभरणम्।
इति वृषभध्वजरूपं तापत्रयहरणम्।। हर०

शंखनिनादं कृत्वा झल्लरि नादयते।
नीराजयते ब्रह्मा वेदऋचां पठते।।
अतिमृदुचरणसरोजं हृत्कमले धृत्वा।
अवलोकयति महेशं ईशं अभिनत्वा।। हर०

ध्यानं आरति समये हृदये अति कृत्वा।
रामस्त्रिजटानाथं ईशं अभिनत्वा।।
संगीतमेवं प्रतिदिनपठनं यः कुरुते।
शिवसायुज्यं गच्छति भक्त्या यःशृणुते।। हर०

जय शिव ओंकारा

जय शिव ओंकारा, भज शिव ओंकारा।
ब्रह्मा विष्णु सदाशिव अर्द्धांगी धारा।।
ॐ हर हर महादेव।।

एकानन चतुरानन पञ्चानन राजे।
हंसानन गरुडासन वृषवाहन साजे।। ॐ हर हर०
दो भुज चारु चतुर्भुज अति सोहे।
तीनों रूप निरखता त्रिभुवन-जन मोहे।। ॐ हर हर०
अक्षमाला वनमाला रुंडमाला धारी।
त्रिपुरारी कंसारी करमाली धारी।। ॐ हर हर०
श्वेताम्बर पीताम्बर बाघम्बर अंगे।
सनकादिक गरुडादिक भूतादिक संगे।। ॐ हर हर०
कर मध्ये सुकमण्डलु-चक्र त्रिशूलधारी।
सुखकर्ता दु:खहर्ता जग-पालनकर्ता।। ॐ हर हर०
चौंसठ योगिनी गावत नृत्य करत भैंरूँ।
बाजत ताल मृदंगा, अरु बाजत डमरू।। ॐ हर हर०
काशी में विश्वनाथ विराजे नन्दो ब्रह्मचारी।
नित उठ भोग लगावत, महिमा अतिभारी।। ॐ हर हर०
ब्रह्मा विष्णु सदाशिव जानत अविवेका।
प्रणवाक्षर में शोभित ये तीनों एका।। ॐ हर हर०
त्रिगुण स्वामी की आरती जो कोई नर गावे।
कहत शिवानन्दस्वामी मनवाञ्छित फल पावे।। ॐ हर हर०

भगवान् जगदीश्वर

ॐ जय जगदीश हरे, प्रभु जय जगदीश हरे।।
भक्तजनों के संकट छन में दूर करे।। ॐ
जो ध्यावे फल पावे, दु:ख बिनसे मन का।। प्रभु०

सुख-सम्पत्ति घर आवे, कष्ट मिटे तन का।। ॐ

मात-पिता तुम मेरे, शरण गहूँ किसकी।। प्रभु०
तुम बिन और न दूजा, आस करूँ जिसकी।। ॐ

तु पूरन परमात्मा, तुम अन्तर्यामी।। प्रभु०
पारब्रह्म परमेश्वर, तुम सबके स्वामी।। ॐ

तुम करुणा के सागर, तुम पालन-कर्त्ता।। प्रभु०
मैं मूरख खल कामी, कृपा करो भर्ता।। ॐ

तुम हो एक अगोचर, सबके प्राणपती।। प्रभु०
किस बिधि मिलूं दयामय! तुमको मैं कुमती।। ॐ

दीनबन्धु दुखहर्ता, तुम ठाकुर मेरे।। प्रभु०
अपने हाथ उठाओ, द्वार पड़ा तेरे।। ॐ

विषय-विकार मिटाओ, पाप हरो देवा।। प्रभु०
'श्रद्धा' भक्ति बढ़ाओ, संतन की सेवा।। ॐ

देवी जी की आरती

देवि प्रपन्नार्तिहरे प्रसीद
प्रसीद मातर्जगतोऽखिलस्य।
प्रसीद विश्वेश्वरि पाहि विश्वं
त्वमीश्वरी देवि चराचरस्य।।

जय जय देवि जयति जय, जय मोहिनिरूपे।
मामिह जननि समुद्धर पतितं भवकूपे।। ध्रुवपदम्
प्रवरातीरनिवासिनि निगमप्रतिपाद्ये
पारावारविहारिणि नारायणि हृद्ये।
प्रपञ्चसारे जगदाधारे श्रीविद्ये
प्रपन्नपालननिरते मुनिवृन्दाराध्ये।। जय जय०

दिव्यसुधाकरवदने कुन्दोज्ज्वलरदने
पदनखनिर्जितमदने मधुकैटभकदने।

विकसितपङ्कजनयने पन्नगपतिशयने
खगपतिवहने गहने सङ्कटवनदहने।। जय जय०

मञ्जीराङ्कितचरणे मणिमुक्ताभरणे
कञ्चुकिवस्त्रावरणे वक्त्राम्बुजधरणे।
शक्रामयभयमहरणे भूसुरसुखकरणे
करुणां कुरु मे शरणे गजनक्रोधरणे।। जय जय०

छित्त्वा राहुग्रीवां पासि त्वं विबुधान्
ददासि मृत्युमनिष्टं पीयूषं विबुधान्।
विदरसि दानवऋद्धन् समरे संसिद्धान्
मध्वमुनीश्वरवरदे पालय संसिद्धान्।। जय जय०

श्री अम्बा जी

ॐ जय अम्बे गौरी मैया जय श्यामा गौरी।
तुमको निशिदिन ध्यावत हरि ब्रह्मा शिव जी।।
जय अम्बे गौरी

माँग सिंदूर विराज़त टीको मृगमद को।
उज्ज्वल से दोउ नैना, चंद्रबदननी को।। जय०

कनक समान कलेवर रक्ताम्बर राजे।
रक्तपुष्प गल माला, कण्ठन पर साजे।। जय०

कानन कुण्डल शोभित, नासाग्रे मोती।
कोटिक चंद्र दिवाकर सम राजत ज्योति।। जय०

शुम्भ निशुम्भ बिदारे, महिषासुर-घाती।
धूम्रविलोचन नैना, निशिदिन मदमाती।। जय०

चौंसठ योगिनि गावत, नृत्य करत भैरूँ।
बाजन ताल मृदंगा औ बाजत डमरू।। जय०

भुजा चार अति शोभित, वर-मुद्रा धारी।
मनवाञ्छित फल पावत, सेवत नर-नारी।। जय०

कंचन थाल बिराजत अगर कपूर बाती।
(श्री) माल केतु में राजत कोटिरतन ज्योति।। जय०

(श्री) अम्बे जी की आरती जो कोई नर गावे।
कहत शिवानन्द स्वामी, सुख सम्पत्ति फल पावे।। जय०
ॐ जय अम्बे गौरी।।

परब्रह्म-वन्दना

सत्यव्रतं सत्यपरं त्रिसत्यं,
सत्यस्य योनिं निहितं च सत्ये।
सत्यस्य सत्यं कृतसत्यनेत्रं,
सत्यात्मकं त्वां शरणं प्रपन्नाः।।१।।

नमस्तेसते ते जगत्कारणाय,
नमस्ते चिते सर्वलोकाश्रयाय।
नमो द्वैततत्त्वाय मुक्तिप्रदाय,
नमो ब्रह्मणे व्यापिने शाश्वताय।।२।।

त्वमेकं शरण्यं त्वमेकं वरेण्यं,
त्वमेकं जगत्पालकं स्वप्रकाशम्।
त्वमेकं जगत्कर्तृपातृप्रहर्तृ,
त्वमेकं परं निश्चलं निर्विकल्पम्।।३।।

भयानां भयं भीषणं भीषणानां,
गतिः प्राणिनां पावनं पावनानाम्।
महोच्चैः पदानां नियन्तृ त्वमेकं,
परेषां परं रक्षणं रक्षणानाम्।।४।।

वयं त्वां स्मरामो वयं त्वां भजामो,
वयं त्वां जगत्साक्षिरूपं नमामः।
सदेकं निधानं निरालम्बमीशं,
भवाम्भोधिपोतं शरण्यं व्रजामः।।५।।

भाव यह है कि–

सत्य जिनका व्रत है, जो सत्यपरायण, तीनों काल में सत्य (भाव) स्वरूप, संसार के उद्भवस्थान और अन्तर्यामीरूप से सत्य (संसार) में निहित हैं तथा सत्य और कृत जिनके नैत्र हैं, उन सत्य के सत्य आप सत्यस्वरूप प्रभु की हम शरण हैं।।१।। हे प्रभो! जगत् के कारणरूप और सत्स्वरूप आप को नमस्कार है, सर्वलोकों के आश्रयभूत ज्ञानस्वरूप आप को नमस्कार है, मोक्षप्रद अद्वैततत्त्वरूप आपको नमस्कार है, शाश्वत और सर्वव्यापी ब्रह्म को नमस्कार है।।२।। आप ही एक शरण लेने योग्य हैं, आप ही एक वरण करने योग्य हैं, आप ही एक जगत् को पालन करने वाले तथा स्वप्रकाशस्वरूप हैं, इस जगत् के कर्ता, रक्षक और संहारक भी आप ही हैं तथा सबके परे निश्चल और निर्विकल्प ब्रह्म भी आप ही हैं।।३।। आप भय को भी भय देने वाले हैं, भीषणों के लिये भी भीषणरूप है, प्राणियों की परम गतिस्वरूप और पवित्र को भी पवित्र करने वाले आप ही हैं, आप सर्वोत्तम पद के नियन्ता, परे के भी परे और रक्षकों के भी रक्षक हैं।।४।। हम एक आप का ही स्मरण करते हैं, आप का ही भजन करते हैं, जगत् के साक्षीरूप एक आप को ही नमस्कार करते हैं, आप ही एकमात्र सत्यस्वरूप हैं, निधान हैं, अवलम्बरहित हैं अर्थात् किसी अन्य के अधीन नहीं हैं, इसलिये संसार-सागर के नौकारूप आप ईश्वर की हम शरण लेते हैं।।५।।

ऋषियों ने बताया

जीवन ऐसा हो

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्।।

वेद का अध्ययन कराकर आचार्य शिष्य को शिक्षा देते हैं– सत्य बोलो, धर्म का आचरण करो, स्वाध्याय से प्रमाद मत करो, आचार्य के लिये प्रिय धन लाकर दो, प्रजातन्तु (संतान-परम्परा) का विच्छेद मत करो, सत्य से प्रमाद नहीं करना चाहिए, धर्म से प्रमाद नहीं करना चाहिये, कुशल (आरोग्यादि साधक) कर्म से प्रमाद नहीं करना चाहिये, ऐश्वर्य देने वाले मांगलिक कर्मो से प्रमाद नहीं करना चाहिये, पढ़ने पढ़ाने से प्रमाद नहीं करना चाहिये, देव और पितृकर्म से प्रमाद नहीं करना चाहिये।

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि, तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि, तानि त्वयोपास्यानि, नो इतराणि।।

माता का देवता के सामान आदर करने वाले बनो। पिता का देव के समान सम्मान करने वाले बनो। आचार्य का देव के समान पूजन करने वाले बनो। जो निर्दोष कर्म हैं वे तुम्हें करने चाहिए, अन्य दोषयुक्त कर्म नहीं करने चाहिये। हम आचार्यो के जो शुभ आचरण हैं, वे तुम्हें नियम से करने चाहिये, दूसरे कर्म यदि आचार्य करें, तो भी तुम्हें नहीं करने चाहिये।।

ये के चास्मच्छ्रेयांसो ब्राह्मणाः, तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया

देयम्। संविदा देयम्।।

जो कोई ब्राह्मण अपने से श्रेष्ठ हैं, उन्हें आसनादि देकर तुम्हें उनका श्रम दूर करना चाहिये। श्रद्धा से दान देना चाहिये, श्रद्धा नहीं हो तो भी देना चाहिये, अपने वैभव के अनुसार देना चाहिए, लज्जा से देना चाहिए, शास्त्र के भय से देना चाहिए, विचारपूर्वक देना चाहिए।।

भाव यह है कि श्रद्धापूर्वक तो देना ही चाहिए पर मन में देने की श्रद्धा या भावना न हो तो भी देना चाहिए। और कुछ नहीं तो इस लोक-लज्जा को सोच कर ही देना चाहिए कि मैं नहीं दूँगा तो दूसरे लोग क्या कहेंगे। ओर नहीं तो समाज तथा लोक और परलोक के भय से ही देना चाहिए, पर कुछ न कुछ देना अवश्य देना चाहिए। किसी न किसी प्रकार दान देने की आदत रहनी चाहिए।

अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्। ये तत्र ब्राह्मणाः संमर्शिनः। युक्ता आयुक्ताः अलूक्षा धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा अत्र वर्तेथाः।।

यदि कदाचित् तुझे श्रौत और स्मार्त अथवा अन्य किसी कर्म में संशय हो अथवा लौकिक आचार में संशय हो तो जो ब्राह्मण विचारशील, कर्म में नियुक्त, स्वेच्छा से कर्मों का अनुष्ठान करने वाले, सरल शान्त स्वभाव वाले और धर्म की ही कामना वाले हैं, जैसे वे उस कर्म में अथवा व्यवहार में बर्तते हों, उसी प्रकार तुम्हें बर्तना चाहिए।।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाक् भवेत्।।

सब लोग सुखी हों। सब लोग सदा नीरोग रहें। सब का भला हो और कभी कोई दुःख ना देखें।

नत्वहं कामये राज्यं न स्वर्ग नापुनर्भवम्।
कामये दुःखतप्तानां प्राणिनामार्तिनाशनम्।।

मुझे राज्य, स्वर्ग या मोक्ष की भी कामना नहीं है। मैं तो दुःखी

लोगो का दुःख दूर कर देना चाहता हूँ।

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठान् हि मानवः।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम्।।

वेदशास्त्रों के द्वारा बताए गए धर्मानुसार आचरण करने वाला मनुष्य इस लोक में यश और परलोक में परम पद को प्राप्त करता है।

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च।
तस्मादस्मिन्समायुक्तो नित्यः स्यादात्मवान्द्विजः।।

वेदशास्त्रों के बताए हुए मार्ग पर चलना या सदाचार का पालन ही परम धर्म है। इसलिए वेदोक्त सदाचार के पालन में सदा तत्पर रहना चाहिए।

कलिः शयानो भवति संजिहानस्तु द्वापरः।
उत्तिष्ठंस्त्रेता भवति कृतं सपद्यते चरन्।।
चरैवेति चरैवेति।

अर्थात् सोए पड़े रहने वाला व्यक्ति कलियुग में जीता है। जब वह निद्रा को छोड़कर जंभाई लेने लगता या उठने की तैयारी करने में लग जाता है तो द्वापर-कर्तव्याकर्तव्य की दुविधा जनक स्थिति में आ जाता है। जब उठकर कर्म करने के लिए खड़ा हो जाता है तो त्रेता में और जब चल पड़ता है–अध्यात्म मार्ग की ओर अग्रसर हो जाता है–तो सत्युग जीवन की श्रेष्ठतम घड़ियों में पहुँच जाता है।

इसलिए चलते रहो, निरन्तर आगे की ओर बढ़ते रहो यही है आदेश वेद भगवान् का।

ॐ असतो मा सद्गमय।
ॐ तमसो मा ज्योतिर्गमय।
ॐ मृत्योर्मा अमृतं गमय।

हे भगवान् आप मुझे असत् से सत् की ओर, अन्धकार से प्रकाश की ओर तथा मृत्यु से अमरत्व की ओर ले चलिए।

ग्रन्थकर्तुः परिचयः

मण्डले भीलवाड़ाख्ये राजस्थानेऽस्ति रायपूः।
बिहारीलालशर्मासीत्तत्र विद्वच्छिरोमणिः।।१।।
कालूरामो द्विजश्रेष्ठो, हरदेवश्च दैववित्।
पुत्रावेतौ तस्य जातौ, कर्मणि कुशलावुभौ।।२।।
उज्जैनसविधे कालूहेडां सोऽध्यवसच्चिरम्।
तत्रैव लब्धजन्मा श्रीकालूरामात्मजोऽस्म्यहम्।।३।।
अमृतसरसि लब्ध्वा ज्ञानसंपत्प्रकामम्,
निजविरचितग्रन्थावाप्तकीर्तिर्जनेषु।
द्युमणिरिव भवानीशंकरोऽसौ त्रिवेदो,
व्यरचयदतिरम्यं नित्यकर्मप्रकाशम्।।४।।
नित्यकर्मप्रकाशाख्यग्रन्थेनानेन सर्वदा।
सर्वसौख्यकरो देवो प्रीयतां मे सदाशिवः।।५।।
लोकाक्षिखाक्षिसंख्याते वैक्रमे नववत्सरे।
नित्यकर्मप्रकाशोऽयम्पूर्णः श्रीशप्रसादतः।।६।।

इति दिल्लीनगरनिवासिश्रीभवानीशंकरत्रिवेदरचितस्य कर्मकाण्डप्रकाशस्य 'नित्यकर्मप्रकाशाख्यः' प्रथमोभागः सम्पूर्णः।

श्रीरस्तु शिवमस्तु सर्वजगताम्।

तस्मिँल्ललितसुदेशे शाला मणिरचिता।
तन्मध्ये हरनिकटे गौरी मुदसहिता।
क्रीडा रचयति भूषारञ्जित निजमीशम्।
इन्द्रादिक सुर सेवत नामयते शीशम्।। हर०

विबुधवधु बहु नृत्यति हृदये मुदसहिता।
किन्नर गायन कुरुते सप्तस्वर सहिता।।
धिनकतथै थै धिनकत मृदंगं वादयते।
कण कण ललिता वेणुं मधुरं नाटयते।। हर०

रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता।
चक्रावर्ते भ्रमयति कुरुते तां धिक तां।।
तां तां लु चुप तां तां डमरुं वादयते।
अंगुष्ठांगुलिनादं लासकतां कुरुते।। हर०

कर्पूरद्युतिगौरं पञ्चाननसहितम्।
त्रिनयनशशधरमौलिं विषधरकण्ठयुतम्।।
सुन्दरजटाकलापं पावकयुतभालम्।
डमरुत्रिशूलपिनाकं करधृतनृकपालम्।। हर०

मुण्डै रचयति माला पन्नगमुपवीतम्।
वामविभागे गिरिजारूपं अतिललितम्।।
सुन्दरसकलशरीरे कृतभस्माभरणम्।
इति वृषभध्वजरूपं तापत्रयहरणम्।। हर०

शंखनिनादं कृत्वा झल्लरि नादयते।
नीराजयते ब्रह्मा वेदऋचां पठते।।
अतिमृदुचरणसरोजं हृत्कमले धृत्वा।
अवलोकयति महेशं ईशं अभिनत्वा।। हर०

ध्यानं आरति समये हृदये अति कृत्वा।
रामस्त्रिजटानाथं ईशं अभिनत्वा।।
संगीतमेवं प्रतिदिनपठनं यः कुरुते।
शिवसायुज्यं गच्छति भक्त्या यःश्रृणुते।। हर०